# पाठ-२३
# हृदय - परिवर्तनम्

**सारान्शः**
ब्राह्मणवेशधारिणः पञ्च यक्षाः बुभुक्षिताः पिपासिताः च मैत्रबलनाम्नः राज्ञः राज्ये विचरन्ति । तेषु एकः स्वागमनकारणम् अपराधे कृते यक्षाधिपतिना राज्यनिःसारणं कथयति। तत्रैव वने ते केनापि गोपालकेन वादितं वंशीध्वनिम् शृण्वन्ति । समीपे एव गावः विचरन्ति स्म तेन तैः अनुमितं यत् वंशीवादकः गवां समीपे एव भवेत्। किंचित् कालानन्तरं तृतीयः यक्षः सर्वान् आह्वयति पश्यत, पश्यत, वटवृक्षस्य मूले कोऽपि युवा वंशीं वादयति। तत्पार्श्वे एव चलामः ।यदा निर्जने वने गोपालकः ब्राह्मणवेषाणाम् यक्षाणाम् स्वागतम् करोति तदा ते वने तस्य निर्भीकतायाः कारणं पृच्छन्ति। सः कथयति यत् राज्ञि बोधिसत्त्वे मैत्रीबले राज्यं शासति, सर्वे जनाः निर्भयाः सन्ति। प्रजाजनम् अकारणं द्वेषपराः राक्षसाः अपि हिंसितुम् न प्रभवन्ति। राज्ञः गुणान् श्रुत्वा ते अग्रे गच्छन्ति।द्वारपालः राजानं सूचयति यत् द्वारे पञ्च पथिकाः भोजनेच्छया तिष्ठन्ति। राजा मन्त्रिणं तेभ्यः भोजनव्यवस्थां कर्तुम् आदिशति । किन्तु राजोचितं विविधं भोजनम् दृष्ट्वा ते एतत् न भक्षयन्ति। केवलं मांसरुधिरमेव तेषाम् भोजनम् । सहसा ते दीर्घाकारं विकरालं रूपम् धारयन्ति । राज्ञे जीवहिंसा न रोचते। अतः सः स्वशरीरेण आतिथ्यं कर्तुमिच्छति । वैद्यान् आहूय नृपः स्वयं निशितेन अस्त्रेण स्वमांसानि छित्वा यक्षेभ्यः प्रयच्छति । यक्षाः चिन्तयन्ति यत् कथं विचित्रोऽयं नृपः यः मांसच्छेदवेदनाभिः अपि प्रसन्नमुखः अस्ति। ते क्षमायाचनां कुर्वन्ति, राज्ञः पादयोः च पतन्ति । राजा कथयति यत् यदि ते राज्ञः प्रियम् इच्छन्ति तर्हि प्राणिहिंसा, परद्रव्यलोभ, मद्यपानम्, निन्दावचनानि च विषवत् त्यजन्तु । यक्षाः सहर्षम् एवं कर्त्तुम् प्रतिजानन्ति। राजानम् प्रणभ्य तस्य प्रदक्षिणां च कृत्वा अन्तर्हिताः भवन्ति। दैवकृपया मैत्रबलः राजा अपि पूर्ववत् अक्षतदेहः जातः ।

**मुख्य बिन्दवः**
'हृदयपरिवर्तनम्' नाम्नः एकांकिनाटकस्य एषा कथा मैत्रीबलजातकात् गृहीता सम्पादिता च। अस्य जातकस्य रचयिता महाकविः आर्यशूरः यस्य समयः तृतीया रव्रीष्टाब्दी निर्णीयते विद्वद्भिः । मूलपुस्तके क्रमेण एतानि एकादशजातकानि 3, 4, 8, 10, 12, 14, 15, 16, 19, 31 सन्ति। अस्य मुद्रणम् 1891 ईश्वीयवर्षे अमेरिकादेशान्तर्गत-हार्वर्ड विश्वविद्यालयद्वारा अभवत् । अत्र उपनिबद्धाः सर्वाः कथाः प्रायेण पालिभाषायाम् लिखित– पिटकग्रन्थेम्यः जातकग्रन्थेभ्यः च संगृह्य आर्यशूरेण संस्कृतभाषायाम् अनूदिताः सन्ति। इयं जातकमाला पंचतंत्रादिवत् उपदेशप्रधानकथावस्तुघटितः प्रबन्धो वर्तते। चम्पूकाव्यवत् एषा अपि रचना गद्य-पद्यमयी अस्ति । परम् अस्याः भाषा सरसा, सरला मनोहारिणी च वर्तते ।

**अवगच्छामः**
संसारे सज्जनाः अपि भवन्ति दुर्जनाश्चापि । दुर्जनास्तु प्रायः परपीडायाम् आनन्दम् अनुभवन्ति। परम् एतादृशाः अपि प्रसङ्गाः उपलभ्यन्ते यत्र सज्जनानां महापुरुषाणां संगत्या तेषाम् दुष्टानाम् हृदयपरिवर्तनम् जातम्, ते कुमार्गं त्यक्त्वा सत्पथगामिनः अभवन् । के ते गुणाः येन सज्जनः भवामः।

**(i)** लोकानुरञ्जन/लोक कल्याणम्
स्नेहं दयां च सौरव्यं च यदि वा जानकीमपि।

**(ii)** परोपकारः
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा
(उत्तररामचरितम्)

**(iii)** परोपकाराय सतां विभूतयः ।
(क) अतिथिदेवो भव ।
(ख) सर्वेषामभ्यागतो गुरुः ।

**(iv)** अहिंसा - अहिंसा परमो धर्मः ।

**आवश्यकोऽयं ज्ञानम्**
एतासु जातककथासु बोधिसत्त्वस्य उदारता - वीरता-अहिंसा-दानादिगुणानाम् कथारूपेण मनोहरं प्रेरकं च वर्णनं विद्यते। सर्वाः कथाः बोधिसत्त्वस्य तेषु जन्मान्तरेषु तं तं लोकोपकारवृत्तं श्रावयन्ति समुपदिशन्ति च मानवान् विशेषतः बालकान् सत्कर्मणां सदाचारशीलतायाः च । मैत्रीबलजातके मैत्रबलस्य मैत्रीभावनायाः ईदृशः परिणामोऽभवत्, येन यक्षाः राक्षसाः अपि तेषु आक्रमणं कर्तुम् समर्थाः नासन्। अपितु तस्य राज्ञः त्यागभावनां दृष्ट्वा तेषा यक्षाणाम् अपि हृदयपरिवर्तनम् अभवत् । यस्मिन् राष्ट्रे, समाजे, परिवारे, वा सौमनस्यं सद्भावना च विराजते तत्र सुखं, शान्तिः समृद्धिः च विलसन्ति।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**1.**'रुच्' एवं ' दा ' धातुयोगे चतुर्थी विभक्तेः प्रयोगः भवति।
**2.**'अलं' योगे तृतीया विभक्तिः भवति । यथा हि- अलं विवादेन, कोलाहलेन, कलहेन ।

**3.तव्यत्-** प्रत्यये कर्तृपदं तृतीयाविभक्तौ कर्मपदं प्रथमाविभक्तेः क्रिया च कर्मानुसारं भवति। यदि वाक्ये कर्म नास्ति तदा क्रिया सदा नपुंसकलिंगे एकवचने आगच्छति।तव्यत्प्रत्ययः धातोः भवति । तव्यत् प्रत्ययान्तं पदं विशेषणं भवति ।

**शब्दार्थाः**

1. घोरम् = भयंकर
2. स्वैरम् = स्वेच्छापूर्वक
3. विहरिष्यामः = विहार करेंगे
4. यामः = जाते हैं
5. निषण्णः = बैठा हुआ
6. भीतिम् = भय को
7. स्वस्त्ययनेन = रक्षक से
8. त्वदीयं = तुम्हारा

**योग्यतां वर्धयत**

वाल्मीकिमहर्षिः श्रीमद्रामायणस्य कर्ता। अयम् आदिकविरित्युच्यते। अस्य पिता प्रचेताः। रत्नाकरः इति वाल्मीकेः मूलं नाम। प्रचेतसः पुत्रः इति कारणेन प्राचेतसः इति अस्य अपरं नाम। जन्मना अयं व्याधः आसीत्। रत्नाकरः अरण्यमार्गे गच्छतः जनान् भाययित्वा चौर्यं कृत्वा जीवति स्म। एकदा तस्मिन् मार्गे नारदमहर्षिःसमागतः। नारदमहर्षिं दृष्ट्वा चौर्यं कर्तुं रत्नाकरः तत्सकाशं गतवान्। रत्नाकरः यथार्थमवगच्छति। ज्ञानोदयः सञ्जायते।

**पाठ संप्रेष्यः**

- राजा मैत्रबलः बोधिसत्त्वः आसीत् ।
- मैत्रबलः अहिंसाप्रियः करुणापरः परहितरतः अतिथिसेवकः च आसीत्।
- यक्षाः ब्राह्मणवेशधारिणः राक्षसाः आसन् ।
- मैत्रबलस्य महता त्यागेन तेषां हृदयम् परिवर्तितम् ।
- ते मैत्रबलं मांसभक्षण-परित्यागस्य प्रतिज्ञां कुर्वन्ति ।
- बहुव्रीहिसमासे अन्यपदस्य प्रधानता भवति तस्मै च अर्थानुसारम् 'तत्' इति सर्वनाम
- प्रयुज्यते ।
- 'तव्यत्' प्रत्ययः धातुना सह युज्यते । अस्य प्रयोगे कर्तरि तृतीयां कर्मणि प्रथमा भवति। अस्य रूपाणि त्रिषुलिङ्गेषु भवन्ति।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।